# शिक्षाचार्यः

## एन.टी.ए. सीयूईटी-पीजी 2024
## प्रवेशपरीक्षायै (ACQP02) निर्देशिका

# Master of Education

## NTA CUET-PG 2024
## Guidelines for Entrance Test - ACQP02

**[updated on 19.01.2024]**


## केन्द्रीयसंस्कृतविश्वविद्यालयः

(संसदः अधिनियमेन संस्थापितः)

(NAAC द्वारा 'A++' श्रेण्या प्रत्यायितः)

56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली – 110058

**फोन न. 011-28521258, जालपुटम् - www.sanskrit.nic.in, वै-पत्रम् – et2024@csu.co.in**

**विषयानुक्रमणिका**


| क्र. सं. | विषयाः | पृ. सं. |
|---|---|---|
| 1. | केन्द्रीयसंस्कृतविश्वविद्यालयस्य संक्षिप्तपरिचयः | 3 |
| 2. | शिक्षाचार्यकक्षायां (एम्.एड्.) प्रवेशार्थं योग्यताः | 3 |
| 3. | शिक्षाचार्यपाठ्यक्रमाय उपलब्धस्थानसङ्ख्या | 4 |
| 4. | आरक्षणम् | 4 |
| 5. | आरक्षितश्रेणीनां प्रमाणपत्रदातारः अधिकारिणः | 5 |
| 6. | शिक्षाचार्यप्रवेशपरीक्षायै (2024) निर्देशाः | 5 |
| 7. | परीक्षाकेन्द्राणि | 5 |
| 8. | अत्यावश्यकसूचनाः | 6 |
| 9. | विश्वविद्यालयपरिसरेषु अध्ययनार्थं सद्यस्क-आवेदनाय निर्देशाः | 6 |
| 10. | सद्यस्क-आवेदनात् प्राक् ध्यातव्यतथ्यानि | 6 |
| 11. | परीक्षावधिः परीक्षासम्बद्धसूचनाः च | 6 |
| 12. | प्रश्नपत्ररूपरेखा | 7 |
| 13. | मूल्याङ्कनविधिः | 7 |
| 14 | परीक्षापरिणामसम्बद्धाः विशेषसूचनाः | 7 |
| 15. | शिक्षाचार्यप्रवेशपरीक्षायाः (2024) पाठ्यक्रमः | 8 |
| 16. | प्रवेशपरीक्षायां पृष्टव्यप्रश्नानाम् उदाहरणानि | 8 |

## शिक्षाचार्य (एम्.एड्.) प्रवेशपरीक्षा – 2024

### 1. केन्द्रीयसंस्कृतविश्वविद्यालयस्य संक्षिप्तपरिचयः

सर्वकारस्य (1956) संस्कृतायोगकृतानुशंसाधारेण भारतसर्वकारद्वारा 1970 इत्यस्मिन् वर्षे राष्ट्रियसंस्कृत-संस्थानस्य स्थापना अभवत्। अस्य मुख्योद्देश्यम् आभारतं संस्कृतशिक्षा, शिक्षणम्, अनुसन्धानसम्वर्धनम्, प्रचारः संरक्षणञ्च वर्तते। इदं पूर्णतः भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयद्वारा (साम्प्रतं शिक्षामन्त्रालयेन) वित्तपोषितम् आसीत्। पारम्परिकसंस्कृतशिक्षायाः प्रचारप्रसारक्षेत्रे अस्यावदानं निरीक्ष्य राष्ट्रियसंस्कृतसंस्थानं मई- मासस्य सप्तमदिनाङ्के 2002 इत्यस्मिन् वर्षे मानितविश्वविद्यालयरूपेण समुद्घोषितम्। सम्प्रति राष्ट्रियसंस्कृतसंस्थानं केन्द्रीयसंस्कृतविश्वविद्यालय-अधिनियमः 2020 (इत्यस्य संख्या 5) अन्तर्गतं संसदा केन्द्रीयसंस्कृतविश्वविद्यालयः, दिल्ली इति रूपेण पारितः। महामहिमराष्ट्रपतिमहोदयानामनुमोदनोपरान्तं 30 अप्रैल् 2020 इत्यतः केन्द्रीयसंस्कृत-विश्वविद्यालयः, दिल्ली इति रूपेण समारब्धः।

विश्वविद्यालयोऽयम् अखिलभारतीयविश्वविद्यालयसङ्घस्य सदस्योऽस्ति तथा च राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा (NAAC) द्वारा 'ए' इति श्रेण्यां प्रत्यायितोऽस्ति। देशस्य विभिन्नभागस्थेषु परिसरेषु प्राक्शास्त्री इत्यारभ्य आचार्य/ विद्यावारिधिः यावत् अध्ययनं भवति। अस्य त्रिपरिसरेषु द्विवर्षीयशिक्षाचार्यपाठ्यक्रमोऽपि सञ्चाल्यते। शैक्षिकसत्रे (2024-25) शिक्षाचार्यपाठ्यक्रमे प्रवेशार्थम् अखिलभारतीयस्तरे भारतसर्वकारेण सञ्चालितस्य **नेशनल टेस्टिंग एजेन्सी (NTA)** इत्यस्य माध्यमेन शिक्षाचार्यप्रवेशपरीक्षा आयोज्यमाना विद्यते। **शिक्षाचार्यप्रवेशपरीक्षायाः प्रश्नपत्रकूटाङ्कः एन.टी.ए.द्वारा ACQP02 निर्धारितो विद्यते।**

### 2. शिक्षाचार्यकक्षायां (एम.एड.) प्रवेशार्थं योग्यताः

- मान्यताप्राप्तविश्वविद्यालयात्/संस्थानात् शिक्षाशास्त्रि/बी.एड्. (संस्कृतशिक्षणविषयसहितम्) न्यूनातिन्यूनं 50% अङ्काः ।
- येषां प्रवेशार्थिनां शिक्षाशास्त्री (बी.एड.) संस्कृतविषयसहिता नास्ति, परं यदि एतेषां प्रवेशार्थिनां स्नातकस्तरे, स्नातकोत्तरस्तरे वा (बी.ए./एम.ए. स्तरे) संस्कृतविषयः अस्ति, तदा एते अपि शिक्षाचार्याय प्रवेशार्हाः सन्ति।
- B.El.Ed. (with 50% marks) इत्यनेन सह स्नातक/स्नातकोत्तरस्तरे संस्कृतविषयस्य छात्राः प्रवेशार्थम् अर्हाः सन्ति।
- D.El.Ed. (with 50% marks) इत्यनेन सह स्नातक/स्नातकोत्तरस्तरे (with 50% marks) संस्कृतविषयस्य छात्राः प्रवेशार्थम् अर्हाः सन्ति।
- एतैः प्रवेशार्थिभिः संस्कृतमाध्यमेन अध्ययन-परीक्षालेखनस्य क्षमतायाः शपथपत्रस्य समर्पणम् अनिवार्यं भविष्यति।
- अर्हतापरीक्षायां प्रविष्टाः छात्राः अपि आवेदनं कर्तुं शक्नुवन्ति।
- केन्द्रीयसर्वकारस्य नियमानुसारम् अनुसूचितजातिजनजातीयानाम्, अन्याप्रगतजातीयानाम्, अन्यथा सक्षमाणां च कृते न्यूनतम-प्रवेशार्हतायां 5% अङ्कानां शिथिलता भविष्यति।

प्रवेशकाले आवेदनेन सह योग्यतापरीक्षोत्तीर्णतायाः प्रमाणपत्रस्य प्रस्तुतिः अनिवार्या । यदि परीक्षायाः परिणामः अघोषितः भवति तर्हि प्रवेशसमये व्यक्तिगतरूपेण वा गोपनीयरूपेण वा परिणामसम्बद्ध-प्रमाणपत्र-समर्पणे प्रवेशः दीयते, अन्यथा प्रवेशस्य योग्यता निरस्यते ।

**चयनविधिः**

भारतसर्वकारस्य निर्देशानाम् अनुरूपेण केन्द्रीयसंस्कृतविश्वविद्यालयस्य शिक्षाचार्यपाठ्यक्रमे अध्ययनार्थं एन.टी.ए.द्वारा प्रश्नपत्रकूटाङ्केन **(ACQP02)** सह **सीयूईटी-पीजी 2024** इत्यस्याः परीक्षायाः आयोजनं सुनिश्चितम् अस्ति। **प्रवेशपरीक्षायाम् आवेदनात् प्रागेव सर्वे अभ्यर्थिनः एन.टी.ए.द्वारा प्रकाशितसर्वनिर्देशान् सम्यक्तया अवगच्छेयुः। प्रत्येकं स्तरे आवेदनकाले सावधानं समस्तसूचनाः प्रदेयाः।**

शिक्षाचार्यपाठ्यक्रमे प्रवेशाय समस्तैः अभ्यर्थिभिः एन.टी.ए.द्वारा निर्धारित-सद्यस्क-आवेदनप्रक्रियया आवेदनीय-मस्ति । आवेदनोपरान्तम् एन.टी.ए.द्वारा निर्धारितेषु विभिन्नकेन्द्रेषु आवेदकैः सङ्गणकाधारितपरीक्षणस्य (CBT) माध्यमेन परीक्षा सम्पादनीया अस्ति। चयनमापदण्डानाम् अनुरूपेण प्रवेशपरीक्षोत्तीर्णैः छात्रैः पुनः केन्द्रीयसंस्कृत-विश्वविद्यालयस्य शिक्षाचार्यकृते नियतपरिसरेषु अध्ययनार्थं प्रवेशाय सद्यस्क-आवेदनं करणीयमस्ति ।

प्रवेशार्थम् आवेदनकाले प्रत्येकं छात्रैः केन्द्रीयसंस्कृतविश्वविद्यालयस्य निर्दिष्टपरिसरेषु प्रवेशार्थम् अधिकाधिक-वरीयताक्रमेण स्वीयविकल्पानाम् उल्लेखः करणीयः अस्ति । एतस्याः वरीयतायाः क्रमेण परिसरेषु प्रवेशः शक्यः । इष्टपरिसरे स्थानस्य अनुपलब्धौ वरीयताक्रमानुसारेण अन्यस्मिन् परिसरे प्रवेशार्हता भविष्यति। विश्वविद्यालये प्रवेशार्थम् अखिल-भारतीयस्तरीया वरीयतासूची निर्मातव्या। विश्वविद्यालयस्य जालपुटे सफलछात्राणां सूची यथासमयम् उपारोहणीया भविष्यति ।

**3. शिक्षाचार्यपाठ्यक्रमाय उपलब्धस्थानसङ्ख्या**

विश्वविद्यालये शिक्षाचार्यपाठ्यक्रमाय उपलब्धस्थानसङ्ख्या 165 (पञ्चषष्ठ्यधिकम् एकशतम्) अस्ति ।

| क्र. | परिसरनाम | उपलब्धस्थानानि |
|---|---|---|
| 1. | केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः, जयपुरम् | 55 |
| 2. | केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालपरिसरः, भोपालम् | 55 |
| 3. | केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी | 55 |

**नोट- सम्बद्धपरिसरे प्रवेशस्य, अस्य निरस्तीकरणस्य अधिकारः विश्वविद्यालयस्य सक्षमाधिकार्यधीनो वर्तते।**

**4. आरक्षणम्**

विभिन्नप्रवेशार्थिनां कृते भारतसर्वकारस्य नियमानुसारम् आरक्षणव्यवस्था अधोलिखिता वर्तते -

- अनुसूचितजातीयानां (SC) कृते 15%
- अनुसूचितजनजातीयानां (ST) कृते 7.5%
- अन्य-अप्रगतजातीयानां (OBC) कृते (केन्द्रसर्वकारसूच्यनुसारेण) 27%
- अन्यथासक्षमाणां प्रज्ञाचक्षुषां चा कृते 5%
- युद्धे/सैनिकसंघर्षे सशस्त्रासेनागत-हताहतानां विधवानाम् /अपत्यानाम् कृते 3%
  (प्रमाणपत्रे हताहतावस्थाविषये स्पष्टोल्लेखः अपेक्षितः अस्ति।)
- राष्ट्रिय-अन्ताराष्ट्रियस्पर्धासु प्रतिभागिभ्यः प्रवेशार्थिभ्यः क्रीडालूनां कृते 2%
- आर्थिकरूपेण अक्षमाणां (EWS) कृते 10%

- अन्ताराष्ट्रियानां, पूर्वोत्तरराज्याणां (NER) च अभ्यर्थिभ्यः, जम्मूकश्मीराभ्यर्थिभ्यः, एकल-बालिकाभ्यः आरक्षणम् 5%

उपर्युक्तश्रेणीनाम् आवेदकैः परिसरेषु प्रवेशकाले आरक्षितश्रेणीनिमित्तं विधिवत् विनिर्दिष्टं स्वीयम् प्रमाणपत्रं राजपत्रित-अधिकारिद्वारा सत्यापनपुरस्सरम् आवेदनपत्रेण साकम् अनिवार्यरूपेण समर्पणीयम्। अन्यथा, प्रवेशः निरस्तो भविष्यति। विश्वविद्यालयस्य परिसरेभ्यः आरक्षणनिर्धारणं केन्द्रीयस्तरे एव भविष्यति। अनुसूचितजातेः अनुसूचितजनजातेः, अन्य-अप्रगतजातीयानां च कृते आरक्षितस्थानानि अपरिवर्तनानि भविष्यन्ति। अन्यारक्षणविषये अयं नियमः नास्ति।

**5. आरक्षितश्रेणीनां प्रमाणपत्रदातारः अधिकारिणः**

- अनुसूचितजाति/जनजाति/अन्य-अप्रगतजातीयानां कृते - जिल्लाधीशः/उपजिल्लाधीशः (एस.डी.एम.)/ तहसीलदारः/ एम.आर.ओ.
- दिव्याङ्गानाम् (अन्यथा सक्षमाणां)/प्रज्ञाचक्षुषां कृते राजकीयचिकित्सालयस्य प्रधानचिकित्साधिकारी। 40% विकलाङ्गता, ततोऽपि अधिका वा विकलाङ्गता)।
- सशस्त्रसेनानीनां बालकानां/विधवानां कृते - सैनिक/नाविक/वायुसेनासंघटनानां सचिवः।

**6. शिक्षाचार्यप्रवेशपरीक्षायै (2024) निर्देशाः**

केन्द्रीयसंस्कृतविश्वविद्यालये शिक्षाचार्यकक्षायां प्रवेशार्थिभ्यः एन.टी.ए.द्वारा **सीयूईटी-पीजी 2024** इत्यस्याः परीक्षायाः माध्यमेन देशस्य विभिन्नभागेषु निर्धारितकेन्द्रेषु द्विवर्षीयशिक्षाचार्य (एम्.एड्.) पाठ्यक्रमाय प्रवेशपरीक्षा आयोज्यमाना वर्तते। प्रवेशपरीक्षायाः दिनाङ्कस्य समयस्य च घोषणा एन.टी.ए.द्वारा भविष्यति। योग्यतायुतैः छात्रैः प्रवेशपरीक्षार्थम् अधोलिखितजालपुटस्य माध्यमेन नियतावधौ सद्यस्क-आवेदनं कर्तुं शक्यते -

https://pgcuet.samarth.ac.in/index.php

**प्रमुखदिनाङ्काः**

| | |
|---|---|
| प्रवेशपरीक्षायै सद्यस्क-आवेदनप्रक्रिया | 26 दिसम्बर 2023 तः 24 जनवरी 2024 (11.50 PM पर्यन्तम्) |
| पूर्णतया आवेदितावेदनस्य शुल्कसमर्पणम् | 25 जनवरी 2024 (11.50 PM पर्यन्तम्) |
| आवेदितावेदनस्य संशोधनम् | 27 जनवरी 2024 तः 29 जनवरी 2024 (11.50 PM पर्यन्तम्) |
| प्रवेशपत्रप्राप्तिः | 07 मार्च 2024 |
| परीक्षादिनाङ्कः | 11 मार्च 2024 तः 28 मार्च 2024 |

अभ्यर्थिनः कृपया आवेदनेन च सम्बद्धसमस्तानां महत्त्वपूर्णदिनाङ्कानां विषये एन.टी.ए.द्वारा प्रदीयमानानां सूचनानां विषये जागरुकाः भवेयुः। एतदर्थं एन.टी.ए.संस्थायाः जालपुटं सततम् अवलोकनीयम्। आवेदनप्रवेश-प्रक्रियाणां विषये एन.टी.ए.संस्थायाः एव अन्तिमनिर्णयो भविष्यति।

**7. परीक्षाकेन्द्राणि**

एन.टी.ए.द्वारा निर्धारितेषु परीक्षाकेन्द्रेषु कस्यचित् एकस्य केन्द्रस्य चयनं छात्रैः प्रदत्तसूचनाधारेण भविष्यति। केन्द्रनिर्धारणादीनां सम्बन्धे एन.टी.ए.द्वारा प्रकाशितनियमावल्याः सावधानम् अवलोकनम् आवश्यकम् इति। अभ्यर्थिनः निर्धारितकेन्द्रे एव परीक्षार्थम् अर्हाः भविष्यन्ति।

8. **अत्यावश्यकसूचनाः**

- आवेदनप्रक्रियायाः प्राक् एन.टी.ए.द्वारा प्रकाशितनिर्देशिकायाः, अस्याः निर्देशिकायाश्च अवबोधः आवश्यकः अस्ति ।
- सीयूईटी-पीजी इत्यन्तर्गतं सद्यस्क-आवेदनं ध्यानेन करणीयम् । अपूर्णसद्यस्क-आवेदनम् अस्वीकार्यमिति।
- सद्यस्क-आवेदने लिखितानां तथ्यानां सत्यापनं परीक्षासमये प्रवेशसमये च भविष्यति।
- कस्यचित् तथ्यस्य असत्यत्वे प्रमाणिते सति, यथानियमं न्यायिकदण्डः, परीक्षानिष्कासनम्/ प्रवेशनिरस्तीकरणम् इत्यादिकं यथायोग्यं प्रकल्पयिष्यते।
- एन.टी.ए.द्वारा निर्धारितशुल्कं समर्प्य आवेदनप्रक्रिया सम्पादनीया।

9. **विश्वविद्यालयपरिसरेषु अध्ययनार्थं सद्यस्क-आवेदनाय निर्देशाः**

प्रवेशपरीक्षायाम् उत्तीर्णे सति अभ्यर्थी अध्ययनाय विश्वविद्यालयस्य जालपुटे परिसरचयनं करिष्यति। एतदर्थम् उत्तीर्णाभ्यर्थिनां सूची प्रकाशयिष्यते। उत्तीर्णाभ्यर्थिनः प्रवेशाय सद्यस्क-प्रवेश-आवेदनं केन्द्रीयसंस्कृतविश्वविद्यालयस्य जालपुटे प्रदर्शितनिर्देशानाम् अनुरूपेण कर्तुं शक्नुवन्ति। त्रुटिपूर्ण-अपूर्णानि आवेदनानि, निश्चिततिथ्यनन्तरं समर्पितानि आवेदनानि अस्वीकार्याणि भविष्यन्ति। शिक्षाचार्यप्रवेशपरीक्षायाम् उत्तीर्णाः छात्राः एव वरीयताक्रमेण शिक्षाचार्य-पाठ्यक्रमाय निर्धारितविश्वविद्यालयस्य परिसरेषु प्रवेशार्हाः भविष्यन्ति। इयं वरीयतासूची केवलम् एकशैक्षिकसत्राय (2024-25) एव मान्या भविष्यति। प्रवेशोपरान्तस्य स्थानान्तरणस्य अनुमतिः अशक्या। तथा च प्रवेशोपरान्तं शुल्कमपि अप्रत्यर्पणीयम्। निर्देशिकेयं ध्यानेन पठनीया । यदा अपेक्षिताः अर्हताः विद्यन्ते, तदा एतदर्थम् आवेदनीयम् ।

**परिसरप्रवेशाय आवेदनप्रक्रियार्थम् अवधेयाः अंशाः -**

- एन.टी.ए. द्वारा निर्दिष्टतिथितः परं कृतानि आवेदनपत्राणि स्वीकृतानि न भविष्यन्ति।
- शिक्षाचार्यप्रवेशपरीक्षोत्तीर्णाः छात्राः एव शिक्षाचार्यपाठ्यक्रमे निर्धारितपरिसरे वरीयताक्रमेण प्रवेशाय अर्हाः भविष्यन्ति ।
- प्रवेशार्थम् उत्तीर्णतासूची वरीयतासूची च केवलं शैक्षिकसत्राय 2024 एव मान्ये भविष्यतः।

10. **सद्यस्क-आवेदनात् प्राक् ध्यातव्यतथ्यानि**

- केवलमर्हप्रार्थिभिः परीक्षायां सम्मिलितैर्भाव्यम्। यदि कश्चिदर्हः नास्ति, परन्तु शिक्षाचार्यप्रवेशपरीक्षायां सम्मिलितो भवति, तर्हि परिणामे स एव व्यक्तिगतरूपेण स्वयम् उत्तरदायी भविष्यति।
- शिक्षाचार्यपाठ्यक्रमः एन.सी.टी.ई.द्वारा मान्यताप्राप्तः अस्ति। विश्वविद्यालयस्य विभिन्नपरिसरेषु निर्धरित-सङ्ख्यानुसारं योग्यताक्रमानुसारेण एव प्रवेशः प्रकल्पयिष्यते।
- प्रवेशार्हतापरिशीलनम्, आरक्षणादीनां निश्चयश्च, एतत्सर्वं विश्वविद्यालयस्य अधीनं वर्तते।
- प्रवेशविषये विश्वविद्यालयस्य कुलपतेः निर्णय एव अन्तिमः।
- न्यायिकविषयेषु देहली-उच्चन्यायालयस्य एव क्षेत्राधिकारः भविष्यति।
- पुनः मूल्याङ्कनं नैव भविष्यति।

11. **परीक्षावधिः परीक्षासम्बद्धसूचनाः च**

- परीक्षायै एन.टी.ए. इत्यस्याः नियमावली सावधानं पठनीया ।

- परीक्षावधिः 105 निमेषात्मकः इति । अयञ्च निर्धारित-समयावधिः स्लोट् (Slot) रूपेण निर्धारितो भविष्यति ।
- शिक्षाचार्यप्रवेशपरीक्षायाम् अभ्यर्थी सङ्गणकाधारितपरीक्षणस्य (CBT) माध्यमेन परीक्षां सम्पादयिष्यति। यदि अपेक्ष्यते, सङ्गणकपरिचालनस्य अभ्यासः अवश्यमेव करणीयः ।
- सर्वे 75 बहुविकल्पीया-प्रश्नाः संस्कृतमाध्यमेन भविष्यन्ति।
- प्रत्येकं प्रश्नस्य सम्यक् उत्तराय 4 अङ्काः निर्धारिताः सन्ति, परम् असमीचीनोत्तराय 1 अङ्कः न्यूनीकरिष्यते (Minus Marking)।
- प्रवेशपरीक्षासमये परीक्षाकक्षे प्रवेशपत्रम् अनिवार्यतया प्रस्तोतव्यम्।
- शिक्षाचार्यप्रवेशपरीक्षायाम् अवैधसाधनानि अवलम्बयन् उत्तराणि लेखितुम् अन्यतः साहाय्यं प्राप्नुवन् अनुशासनहीनतां वा प्रदर्शयन् परीक्षार्थी केन्द्राध्यक्षेण सद्यः परीक्षाया बहिष्करिष्यते यथाविधि दण्डनं वा करिष्यते।
- छायाचित्रेण सह वैषम्ये सति, सन्देहे जाते, परीक्षातः निलम्बनम्/प्रवेशात् निलम्बनम्, विधिवत् दण्डनं वा करिष्यते। तदर्थं छात्रः स्वयम् उत्तरदायी भविष्यति।
- परीक्षाभवने गणकयन्त्रं, चलदूरवाणी, स्मार्ट-घटी चेत्यादिकं सर्वथा वर्जितम्।

## 12. प्रश्नपत्रस्य परीक्षणस्य च रूपरेखा

सङ्गणकाधारिता शिक्षाचार्यप्रवेशपरीक्षा बहुविकल्पात्मकप्रश्नपत्रमाध्यमेन भविष्यति । अस्मिन् प्रश्नपत्रे 75 बहुविकल्पीया प्रश्नाः प्रष्टव्याः सन्ति । प्रश्नपत्रे निम्नलिखिताः खण्डाः निर्धारिताः सन्ति –

- **भागः 1 – संस्कृतभाषादक्षता (Proficiency in Sanskrit Language)** (25 बहुविकल्पीयाः प्रश्नाः)
- **भागः 2 – संस्कृतशिक्षणम् (Teaching of Sanskrit)** (25 बहुविकल्पीयाः प्रश्नाः)
- **भागः 3 – शिक्षामनोविज्ञानम् (Educational Psychology)** (25 बहुविकल्पीयाः प्रश्नाः)

प्रत्येकं प्रश्नस्य चत्वारि वैकल्पिकानि उत्तराणि भविष्यन्ति, येषु एकमेव सम्यक् उत्तरं भविष्यति। केवलम् एकं सम्यक् उत्तरं चित्वा सङ्गणकपटले प्रविष्टव्यं भविष्यति ।

## 13. मूल्याङ्कनविधिः

शिक्षाचार्यपाठ्यक्रमस्य माध्यमं संस्कृतमेव अस्ति । प्रवेशपरीक्षायाम् उत्तीर्णतायै अधोलिखिताः निर्देशाः ध्यातव्याः सन्ति –

- त्रिषु खण्डेषु कुलप्राप्ताङ्कानां समानरूपेण गणनया उत्तीर्णतासूची निर्धारिता भविष्यति ।
- सी.यू.ई.टी-पी.जी. 2024 प्रवेशपरीक्षायाः प्राप्ताङ्कानाम् आधारेण विश्वविद्यालयस्य प्रवेशसमितिद्वारा निर्मितायाः वरीयतासूच्याः अनुसारेण प्रवेशः सुनिश्चितो भविष्यति।
- शिक्षाशास्त्रिपाठ्यक्रमे **प्रवेशार्थम्** अर्हतायै अभ्यर्थिना प्राप्तप्राप्ताङ्कानां वरीयतायाः अन्यसम्बद्धनियमानां चानुरूपेण निर्मिता भविष्यति ।

## 14. परीक्षापरिणामसम्बद्धाः विशेषसूचनाः

- प्रवेशपरीक्षापरिणामस्य वरीयतासूचीनिर्माणम् अखिलभारतीयस्तरे भविष्यति ।
- विश्वविद्यालयप्रवेशनीतेः अनुसारेण प्रवेशः भविष्यति ।

- प्रवेशानन्तरं प्रविष्टपरिसरात् अन्यपरिसरं प्रति स्थानान्तरणं न भविष्यति ।

**15. शिक्षाचार्यप्रवेशपरीक्षायाः (2024) पाठ्यक्रमः**

**प्रवेशपरीक्षायाः कूटसङ्ख्या – ACQP02**

**पाठ्यक्रमः**

**SECTION - 1 संस्कृतभाषादक्षता (Proficiency in Sanskrit Language) [25 Questions]**

माहेश्वरसूत्राणि प्रत्याहारनिर्माणञ्च, सन्धिः, समासप्रक्रिया, कारकाणि, उपपदविभक्तयः, लकारप्रयोगः, प्रक्रियाः णिच्, सन्, कृत्प्रत्ययाः, तद्धितप्रत्ययाः, स्त्रीप्रत्ययाः - टाप्, ङीप्, ङीष्।

**SECTION - 2 संस्कृतशिक्षणम् (Teaching of Sanskrit) [25 Questions]**

संस्कृतशिक्षणम्, विभिन्नाः उपागमाः, पाठ्यपुस्तकसम्प्रत्ययः, शिक्षणपद्धतयः उद्देश्यम्, सोपानानि, श्रव्यदृश्योपकरणानि, पाठ्यसहगामिक्रियाः, पाठयोजनासोपानानि

**SECTION - 3 – शिक्षामनोविज्ञानम् (Educational Psychology) [25 Questions]**

मनोविज्ञानपरिभाषा, मनोविज्ञानसम्प्रदायाः, बालानाम् अवस्थागतविशेषताः, अधिगमसंप्रत्ययः विशेषताश्च, अभिप्रेरणा विशेषताश्च, बुद्धिः सिद्धान्ताश्च, व्यक्तित्वस्यार्थः, प्रकृतिः, मापनम्, मानसिकस्वास्थ्यम्, विशिष्टबालकाः, सांख्यिकी।

**16. प्रवेशपरीक्षार्थं पृष्टव्यप्रश्नानाम् उदाहरणानि**

**SECTION - 1 संस्कृतभाषादक्षता**

1. 'विद्यावान्' अस्मिन् पदे अयं प्रत्ययः अस्ति -

| | | | |
|---|---|---|---|
| 1. | वतुप् | 2. | इमतुप् |
| 3. | मतुप् | 4. | वति |

**उत्तरम् - वतुप्**

2. 'द्वित्राः' अत्र समासः अस्ति -

| | | | |
|---|---|---|---|
| 1. | बहुव्रीहिः | 2. | तत्पुरुषः |
| 3. | द्विगुः | 4. | द्वन्द्वः |

**उत्तरम् - बहुव्रीहिः**

**SECTION - 2 संस्कृतशिक्षणम्**

3. व्याकरणशिक्षणाय अयं विधिः उपयुक्तः -

| | | | |
|---|---|---|---|
| 1. | व्याख्याविधिः | 2. | दण्डान्वयः |
| 3. | आगमन-निगमनविधिः | 4. | खण्डान्वयः |

**उत्तरम् - आगमन-निगमनविधिः**

4. अन्वयविधेः वर्णनं प्राप्यते -

1. अन्वयप्रबोधे
2. अन्वयदीपिकायाम्
3. अन्वयप्रकाशे
4. अन्वयशास्त्रे

**उत्तरम् – अन्वयप्रबोधे**

## SECTION – 3 – शिक्षामनोविज्ञानम्

5. अधिगमदिशा व्यवहारवादी अयं नास्ति -

1. स्किनर्
2. थोर्नडाइक्
3. पॉवलव्
4. पियाजे

**उत्तरम् - पियाजे**

7. अधिगमे प्रबलनसिद्धान्तस्य प्रतिपादकोऽयं विद्यते -

1. स्किनर्
2. थोर्नडाइक्
3. पॉवलव्
4. पियाजे

**उत्तरम् - स्किनर्**

**उपर्युक्तमार्गदर्शिकायां सर्वविधस्य परिवर्तनस्य संशोधनस्य च सर्वाधिकारः केन्द्रीयसंस्कृतविश्वविद्यालयाधीनः वर्तते।**